गोविन्दाय नमो नमः स्वाहा। इत्यन्तेनाष्टोत्तरशतमष्टाविंशतिमष्टौ वा जुहुयात्। ततो गुड़घृतेन वसोर्धारां भित्तौ दद्यात्। ततो नाड़ीच्छेदं भावयेत्। ॐ षष्ठ्यै नम इति षष्ठीं पूजयेत्। ततो भगवतः श्रीकृष्णस्य नामकरणान्नप्राशनचूड़ाकरणोपनयनोद्वाहसंस्कारान् भावयेत्। ततः प्रणवादिनमोऽन्तेन तत्तन्नामभिः पूजयेत्। ॐ देवक्यै नमः एवं वसुदेवाय यशोदायै नन्दाय रोहिण्यै चण्डिकायै बलदेवाय दक्षाय गर्गाय चतुर्म्मुखाय इत्यनेन यथाशक्ति पञ्चोपचारैः पूजयेत्। ततः शङ्खेन कुशपुष्पचन्दनजलान्यादाय भूमौ जानुनी पातयित्वा,

ॐ क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव !।
गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम॥
ॐ सोमाय सोमेश्वराय सोमपतये सोमसम्भवाय गोविन्दाय नमो नमः। इत्यर्घ्यं दद्यात्। ततः प्रणाममन्त्रौ।

"ॐ ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः।
नमस्ते रोहिणीकान्त! सुधावास नमोऽस्तु ते॥
नभोमण्डलदीपाय शिरोरत्नाय धूर्ज्जटेः।
कलाभिर्व्वर्द्धमानाय नमश्चन्द्राय चारवे॥"

ततश्च।

"अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम्।
वासुदेवं हृषीकेशं माधवं मधुसूदनम्॥
वराहं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम्।
दामोदरं पद्मनाभं केशवं गरुड़ध्वजम्॥
गोविन्दमच्युतं देवमनन्तमपराजितम्।
अधोक्षजं जगद्वीजं स्वर्गस्थित्यन्तकारिणम्॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम्।
नारायणं चतुर्ब्बाहुं शङ्खचक्रगदाधरम्॥
पीताम्बरधरं नित्यं वनमालाविभूषितम्।
श्रीवत्साङ्कं जगत्सेतुं श्रीकृष्णं श्रीधरं हरिम्।
प्रपद्येऽहं सदा देवं सर्व्वकामप्रसिद्धये॥"
इति स्तवः॥

ततः प्रणमेत्।

"प्रणमामि सदा देवं वासुदेवं जगत्पतिम्।
त्राहि मां सर्व्वदेवेश हरे! संसारसागरात्॥"

ततः प्रार्थयेत्।

"ॐ त्राहि मां सर्व्वपापघ्न दुःखशोकार्णवाद्धरे!।
सर्व्वलोकेश्वर त्राहि पतितं मां भवार्णवे॥
देवकीनन्दन श्रीश हरे संसारसागरात्।
त्राहि मां सर्व्वदुःखघ्न रोगशोकार्णवाद्धरे!॥
दुर्गतांस्त्रायसे विष्णो ये स्मरन्ति सकृत् सकृत्।
सोऽहं देवातिदुर्वृत्तस्त्राहि मां दुःखसागरात्॥
पुष्कराक्ष निमग्नोऽहं मायाविज्ञानसागरे।
त्राहि मां देवदेवेश! त्वत्तो नान्योऽस्ति रक्षिता॥"
इति प्रार्थयेत्॥

"यद्बाल्ये यच्च कौमारे वार्द्धके यच्च यौवने।
तत् पुण्यं वृद्धिमाप्नोतु पापं हर हलायुध!॥"
इति वदेत्॥

ततो नृत्यगीतवादित्रस्तवैः कालं नयेत्। परदिने प्रातःस्नानादिकं कृत्वा भगवन्तं श्रीकृष्णं यथाविधि संपूज्य दुर्गायाश्च महोत्सवः कार्य्यः। ततो ब्राह्मणान् भोजयेत् तेभ्यो दक्षिणां दद्यात् सुवर्णादि यत् किञ्चिदिष्टतमं श्रीकृष्णो मे प्रीयतामिति।

"ॐ यं देवं देवकी देवी वसुदेवादजीजनत्।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः॥
सुब्रह्मवासुदेवाय गोब्राह्मणहिताय च।
शान्तिरस्तु शिवञ्चास्तु इत्युच्चार्य्य विसर्ज्जयेत्॥"

तत्रोपवासपरदिने तिथिनक्षत्रयोरवसाने पारणम्। यदा तु महानिशायाः पूर्व्वमेकतरस्यावसानं अन्यतरस्य महानिशायां तदनन्तरं वा तदेकतरावसाने पारणम्। यदा तु महानिशायामुभयस्थितिः तदा उत्सवान्ते पारणं कुर्य्यात्। तत्र मन्त्रः। ॐ सर्व्वाय सर्व्वेश्वराय सर्व्वपतये सर्व्वसम्भवाय गोविन्दाय नमो नमः। पारणानन्तरन्तु समापनमन्त्रः। ॐ भूताय भूतेश्वराय भूतपतये भूतसम्भवाय गोविन्दाय नमो नमः। इत्यनेन व्रतं समापयेत्॥ * ॥

भाद्रशुक्लपञ्चमीमधिकृत्य भविष्योत्तरे।

"तथा भाद्रपदे मासि पञ्चम्यां श्रद्धयान्वितः।
यस्त्वालिख्य नरो भक्त्या कृष्णवर्णादिवर्णकैः।
पूजयेद्गन्धपुष्पैश्च सर्पिर्गुग्गुलुपायसैः॥
तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः।
आसप्तमात् कुलात्तस्य न भयं सर्पतो भवेत्।
तस्मात् सर्व्वप्रयत्नेन नागान् संपूजयेन्नरः॥"

इयमेवालेख्यनागपञ्चमीति वाचस्पतिमिश्राः। आलेख्यनागाः कर्कोटकादयः पूर्व्वलिखिताः पूजा च श्रावणपञ्चमीविहितेति बोध्यम्॥ * ॥ अथ हरेः पार्श्वपरिवर्त्तनम्। तत्र द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे। आभाकासितपक्षेषु शयनावर्त्तनादिकमिति ब्रह्मपुराणात्॥ भाद्रशुक्लद्वादश्यां श्रवणमध्ययुक्तायां सन्ध्यासमये द्वादश्यान्तचाभावे एकादश्यादिषु पादयोगे तदभावेऽपि द्वादश्यां केवलायां वा कृताह्निकः सायं सन्ध्यायां देवं संपूज्य।

"ॐ वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव।
पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधव!॥"
इति प्राञ्जलिः पठेत्॥

"त्वयि सुप्ते जगन्नाथ! जगत् सुप्तं भवेदिति।
प्रबुद्धे त्वयि बुध्येत जगत् सर्व्वं चराचरम्॥"
इत्यनेन पूजयेत्॥ * ॥

अथ सिंहार्के चतुर्थ्यां चन्द्रदर्शनप्रायश्चित्तम्। सिंहार्कमधिकृत्य ब्रह्मपुराणम्।

"नारायणोऽभिशप्तस्तु निशाकरमरीचिषु।
स्थितश्चतुर्थ्यामद्यापि मनुष्याणापतेच्च सः॥
अतश्चतुर्थ्यां चन्द्रन्तु प्रमादाद्वीक्ष्य मानवः।
पठेद्धात्रेयिकावाक्यं प्राङ्मुखो वाप्युदङ्मुखः॥"

अभिशप्तो मिथ्यापरीवादविषयीभूतः। सोऽभिशापः अद्यापि मनुष्यान् पतेत्। ततश्च प्राङ्मुख उदङ्मुखो वा कुशतिलजलान्यादाय ॐ अद्येत्यादि सिंहार्कचतुर्थीचन्द्रदर्शनजन्यपापक्षयकामो धात्रेयीवाक्यमहं पठिष्ये। इति संकल्प्य।

"ॐ सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।
सुकुमारक! मा रोदीस्तव ह्येष स्यमन्तकः॥"
इति विष्णुपुराणोक्तं धात्रेयीवाक्यं पठेत्॥ * ॥

अथानन्तव्रतम्। तत्र यद्दिने पूर्व्वाह्णलाभस्तद्दिने व्रतम्। उभयदिने चेत् परदिने युग्मात्। व्रतानुष्ठानविधिस्तु पद्धतौ ज्ञेयः॥ * ॥ अथागस्त्यार्घ्यदानम्। प्रमाणन्तु तिथितत्त्वेऽनुसन्धेयम्। सिंहस्थरविकर्त्तव्यत्वेन सौरमासादरः। कन्यार्कसंक्रान्तिपूर्व्वदिनत्रयाभ्यन्तरे कृतस्नानादिकृताह्निकस्तिलकुशजलान्यादाय ॐ तत् सदित्युच्चार्य्य ॐअद्येत्यादि सर्व्वाभिलषितसिद्धिकामोऽगस्त्यपूजनमहं करिष्ये इति संकल्प्य शालग्रामे जले वा दक्षिणामुखः एतत् पाद्यम् ॐ अगस्त्याय नमः। सितपुष्पाक्षतयुक्तं जलं शङ्खेन गृहीत्वा इदमर्घ्यम्।

ॐ काशपुष्पप्रतीकाश अग्निमारुतसम्भव।
मित्रावरुणयोः पुत्त्र कुम्भयोने नमोऽस्तु ते॥
ॐ अगस्त्याय नमः। एवमाचमनीयस्नानीयगन्धपुष्पधूपदीपनैवेद्यादिकं दद्यात्।
ॐ आतापिर्भक्षितो येन वातापिश्च महासुरः।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु॥"
इति प्रार्थयेत्॥ इति कृत्यतत्त्वम्॥

भाद्रपदः, पुं, (भाद्रपदानक्षत्रयुक्ता पौर्णमासी भाद्रपदी सा यत्र मासे सः। भाद्रपदी+अण्।) भाद्रमासः। इत्यमरः। १। ४। १७॥ (यथा,—
"ते तु भाद्रपदाद्येन द्विमासिकेन व्याख्याताः। तद्यथा। भाद्रपदाश्वयुजौ वर्षाः।" इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये॥)

भाद्रपदा, स्त्री, पूर्व्वभाद्रपदानक्षत्रम्। उत्तरभाद्रपदानक्षत्रम्। तत्पर्य्यायः। प्रौष्ठपदा २। इत्यमरः। १। ३। २२॥

भाद्रमातुरः, पुं, (भद्रमातुरपत्यमिति। भद्रमातृ+"मातुरुत्संख्यासम्भद्रपूर्व्वायाः।" ४। १। ११५। इति अण्। "उकारश्चान्तादेशः।" इति काशिका।) सतीतनयः। "सत्यास्तु तनये साध्वातुरवद्भाद्रमातुरः।" इति हेमचन्द्रः। ३। २१०॥

भानुः, पुं, (भाति चतुर्द्दशभुवनेषु स्वप्रभया दीप्यते इति। भा+"दाभाभ्यां नुः।" उणा० ३। ३२। इति नुः।) सूर्य्यः। (यथा, महाभारते। ३। ३। २४।
"अनन्तः कपिलो भानुः कामदः सर्व्वतोमुखः॥")
विष्णुः। यथा, तत्रैव। १३। १४९। २७।
"सर्व्वगः सर्व्वविद्भानुर्विष्वक्सेनो जनार्द्दनः॥"
प्राधायाः पुत्त्रभेदः। यथा, तत्रैव। १। ६५। ४८।
"विश्वावसुश्च भानुश्च सुचन्द्रो दशमस्तथा।
इत्येता देवगन्धर्व्वा प्राधायाः परिकीर्त्तिताः॥"
अङ्गिरःसुतस्तपसः पुत्त्रभेदः। यथा, तत्रैव। ३। २२०। ८।